# Matangi Ashtottarashatanama Stotram

# માતઙ્ગ્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Matangi Ashtottarashatanama Stotram 2

File name : mAtangyaShTottarashatanAmastotram2.itx

Category : aShTottarashatanAma, devii, stotra, devI, dashamahAvidyA

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description-comments : Kalivilasatantra

Latest update : March 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 23, 2024

*sanskritdocuments.org*

Matangi Ashtottarashatanama Stotram

# માતઙ્ગ્યષ્ટોત્તરશતનામસ્તોત્રમ્

(અથ શ્રીકાલીવિલાસતન્ત્રે સપ્તદશપટલઃ ।)
શ્રીતામસ ઉવાચ ।
માતઙ્ગી શતનામાનો-દાનીં કલિમતે શ઼ૃણુ ।
યસ્ય પ્રસાદા દીશોહં પાર્વતિ પ્રાણવલ્લભે ॥ ૧॥

અસ્ય શ્રીમાતઙ્ગી શતનામસ્તોત્રસ્ય શ્રીકૃષ્ણ
ઋષિર્ગાયત્રીચ્છન્દઃ શ્રીમાતઙ્ગી દેવતા ચતુર્વર્ગ
સિદ્ધ્યે વિનિયોગઃ ॥

ૐ માધવી મથુરા મત્તા માનનીયા મદોદ્ધતા ।
માન્યા ચ માનદાત્રી ચ મનીષા માનમોહિની ॥ ૨॥

મથુરા માધવી મધ્યા માનસી મનમોહિની ।
માધુરા માનયોગ્યા ચ મત્તમાતઙ્ગગામિની ॥ ૩॥

મેનકા માનવી મેધા મદના મદનોત્તરા ।
મત્તા પ્રમત્તા મદના મોદના મદનોદ્ધતા ॥ ૪॥

માનની માનયોગ્યા ચ મેખલા મરમોહિની ।
મનોરૂપા ઉન્મની ચ માષામેધામદોદ્ધતા ॥ ૫॥

નિમેષા નિર્નિમેષા ચ માનગી મથુરા તથા ।
મદમત્તા મહામત્તા માનદા મધુસૂદની ॥ ૬॥

મતિર્માતા મહાલક્ષ્મીર્નિત્યા મદનપીડિતા ।
મેઘવિદ્યુત્પ્રભાકાશા મેઘાનન્દપ્રવર્દ્ધિની ॥ ૭॥

મદના મદરૂપા ચ મુનિગુહ્યા મુનિસ્તુતા ।
અર્થરૂપા મહામેધા માયા મત્તા સ્વરૂપિણી ॥ ૮॥

મુકુન્દપૂજિતા મૌની મૌનવ્રતપરાયણા ।

મેધા મેધાવતી મધ્યા મદના મદનાતુરા ॥ ૯॥

માનુષી ચ મનોરૂપા મહામોહસ્વરૂપિણી ।
તરણી તરુણી તારા તારિણી તરલેક્ષણા ॥ ૧૦॥

તુરીયા ચ તથા તુથ્યા તુલ્યા ચ તામસી તિથિઃ ।
તીર્થાતીર્થ મયી તીર્થરૂપિણી તામસાન્તરા ॥ ૧૧॥

તપસ્યા તાપસી તાપા તપના તુલના ઇતિ ।
ગોલોકવાસિની ગમ્યા ગુણજ્ઞા ગુણરૂપિણી ॥ ૧૨॥

ગૌરી ચ ગોપિની ગૌરા ગાનાગાનસ્વરૂપિણી ।
ગિરીશા ગિરિશા ગન્ધા ગગણા ગગણેશ્વરી ॥ ૧૩॥

ઈકારરૂપિણી નિત્યા ઈશ્વરી ઈશ્વરપ્રિયા ।
સઙ્ગૃહ્ય ઇતિ તે દેવિ શતનામ ઇતીરિતમ્ ॥ ૧૪
ત્રિસન્ધ્ય યઃ પઠેન્નિત્યં તસ્ય સિદ્ધિર્ન સંશયઃ ॥ ૧૫॥

ઇતિ શ્રીકાલીવિલાસતન્ત્રે શ્રીમાતઙ્ગીશતનામસ્તોત્રં સમાપ્તમ્ ।
ૐ તત્સદિત્યાદિ ।

ઇતિ શ્રીકાલીવિલાસતન્ત્રે સપ્તદશપટલઃ સમાપ્તઃ ।

Proofread by Rajesh Thyagarajan

*Matangi Ashtottarashatanama Stotram*

pdf was typeset on March 23, 2024

Please send corrections to *sanskrit@cheerful.com*